# Shri Dharmanandana Ashtakam

# श्रीधर्मनन्दनाष्टकम्

## Document Information

Text title : Shri Dharmanandana Ashtakam

File name : dharmanandanAShTakam.itx

Category : vishhnu, svAminArAyaNa, krishna, aShTaka

Location : doc_vishhnu

Author : achintyAnandabrahmachArI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# श्रीधर्मनन्दनाष्टकम्

मुक्तानां सदसि सदा विराजमानं
पूर्णेन्दु-प्रवरमुखाब्ज-पत्रनेत्रम् ।
मन्दार-स्थलरुह-कुन्दसारहारं
धर्माङ्ग-प्रभवमहं हरिं प्रपद्ये ॥ १॥

अभोज-ध्वजकलशां-कुशोर्ध्वैरेखा
गोपाद-प्रमुखसुलक्ष्म-पादपद्मम् ।
सामोद-भ्रमरविगुञ्जिता-वचूलं
धर्माङ्ग-प्रभवमहं हरिं प्रपद्ये ॥ २॥

भक्तेभ्यो विहितसबीज-साङ्ख्ययोगं
प्रावारप्रचलित-कञ्चुकाभिरामम् ।
श्रीखण्ड-प्रवर-तमालपत्र-मीशं
धर्माङ्ग-प्रभवमहं हरिं प्रपद्ये ॥ ३॥

विद्योतन्मणिमय-हेमकुण्डल-श्री-
कर्णाग्रोत्तम-कुसुमा-वतंसरम्यम् ।
श्रीवत्सोल्लसित-भुजान्तरं सदीशं
धर्माङ्ग-प्रभवमहं हरिं प्रपद्ये ॥ ४॥

संसार-प्रशमन-कारण-प्रतापं
बिभ्राणं सुरुचिर मौक्तिकीञ्च मालाम् ।
हस्ताग्रे सुललित-मालिकां दधानं
धर्माङ्ग-प्रभवमहं हरिं प्रपद्ये ॥ ५॥

शान्तानां विदलित-मानमत्सराणां
कामादिप्रबल-विपक्षनिर्जयानाम् ।
साधूना-मनिश-मवेक्षणीय-रूपं
धर्माङ्ग-प्रभवमहं हरिं प्रपद्ये ॥ ६॥

वेदान्तै-रुदित-सुकीर्ति-माप्तकामं
जुष्टाङ्घ्रिं विजितविदूषणैर्मुनिन्द्रैः ।
ब्रह्माण्ड-स्थपति-सुरेश्वरैकनाथं
धर्माङ्ग-प्रभवमहं हरिं प्रपद्ये ॥ ७॥

रम्याणां विमल-सुवर्णभूषणानां
श्रीमत्तामवयव-शोभाया दधानम् ।
घर्मान्त-प्रभाव-नवीन-मेघनीलं
धर्माङ्ग-प्रभवमहं हरिं प्रपद्ये ॥ ८॥

इति श्री अचिन्त्यानन्दब्रह्मचारीविरचितं श्रीधर्मनन्दनाष्टकं सम्पूर्णम् ।

---

*Shri Dharmanandana Ashtakam*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*